**॥अथर्ववेदीयम् पृथिवीसूक्तम् / भूमिसूक्तम्॥ काण्डम् – १२॥ मन्त्रसंख्या ६३ (पाठ्यम् १-१२)॥**

**॥ऋषि – अथर्वा॥ देवता- भूमिमाता पृथिवीमाता वा॥**

विचित्ररूपिणी एषा पृथिवी अस्माकं समीपे सदा अन्तहीना विस्मयरूपैका। तया सह अस्माकं निविडः सम्बन्धः वर्तते। तस्याः हि क्रोडे अस्माकं जन्मः तस्याः हि क्रोडे च अन्तः। अथ वैदिकऋषिणां दृष्ट्यानुसारं एषापि एका देवता इति। एषा भवति भूमिमाता धरित्रि जननी वा। अथ प्राचीनैः वैदिकऋषिभिः पृथिवी मातृरूपेण द्युलोकश्च पितृरूपेण ज्ञापितम्[1]। तेषां दृष्ट्या एते विश्वस्य आदिजनकजनन्यौ भवतः। तयोः मिलनेन समग्रसृष्टेः आविर्भावः तयोः क्रोडे एव समग्रस्य च परिवर्धनः।

वैदिकऋषिमते एषा पृथिवी विस्तृर्णा महती सुखप्रदायिनी घृतवती पयस्वती यज्ञवती च। अस्याः पृथिव्याः कुत्र समतलः कुत्र च बन्धुरः। अस्यां नदी-पर्वत-समुद्र-भिन्नप्राणिनां वनस्पतीनां मणिरत्नाणां च आधारः। अस्माकं पूर्वपुरुषाणां सर्वान् ख्यातिं कीर्तिञ्च धारयति एषा पृथिवी। देवगणैः सेविता एषा भूमिमाता पवित्रयज्ञकर्मणः श्रेष्ठवेदीस्वरूपा। विश्वधात्री जननी सर्वदेवैः पुज्या।

एवं प्रकारेण अर्थवेदस्य अस्मिन् भूमिसूक्ते ऋषिभिः भूमेः महिमाकीर्त्तनं प्रकटितम्। अत्र दार्शनिकभावनया सह प्रकृतिप्रेम सुन्दररीत्या दृश्यते। ऋषेः अथर्वायाः दृष्ट्या एषा पृथिवी एका परमविस्मयरूपा।

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥१॥

---

[1] द्यौष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः।(ऋ.६.५१.५)

**অন্বয় ঃ** বৃহৎ সত্যম্ (বিশাল মহান সত্য), উগ্রম্ ঋতম্ (কঠোর শাশ্বত নিয়ম), দীক্ষা (সংকল্প), তপঃ (তপশ্চর্যা), ব্রহ্ম (প্রার্থনা), যজ্ঞঃ (এতে) পৃথিবীম্ (পৃথিবীকে) ধারয়ন্তি (ধারণ করে থাকে)। সা (সেই) নঃ (আমাদের) ভূতস্য (যা কিছু অতীত তার) ভব্যস্য (যা ভবিষ্যতে সম্ভাব্য তার) পত্নী (অধীশ্বরী) পৃথিবী (পৃথিবী) নঃ (আমাদের জন্য) উরুম্ (বিস্তৃত) লোকম্ (লোক) কৃণোতু (প্রদান করুন)।।

**বঙ্গানুবাদ ঃ** বৃহৎ (মহান) সত্য, উগ্র (বলবান) ঋত (শাশ্বত নিয়ম), দীক্ষা, তপঃ (তপশ্চর্যা), ব্রহ্ম (প্রার্থনা) এবং যজ্ঞ — এরা সকলে পৃথিবীকে ধারণ করে রয়েছে। অতীতে সংঘটিত এবং ভবিষ্যতে সম্ভাব্য যা কিছু তার অধীশ্বরী পৃথিবী আমাদের জন্য বিশাল (বিস্তৃত) লোক প্রদান করুন।।

व्याख्या – अर्थववेदीये अस्मिन् भूमिसूक्तस्य प्रथमे मन्त्रे ऋषिभिः अस्याः पृथिव्याः धारणं संरक्षणं पालनं बर्द्धनञ्च केन उपायेन सम्भवति तद्विषये आलोचना कृता। वस्तुतः सत्यऋतादिगुणैः अस्याः भूमिमातुः धारणं भविष्यति। अर्थात् ये मनुष्याः सदा सत्यवादिनः, सदा नियमपालकाः, व्रतधारिणः, तपसि संयुक्ताः, यज्ञे रताः, ब्रह्मणि स्थिताः च ते इमां पृथिवीं धारयन्ति। अर्थात् एते मनुष्याः भूमेः धारणकार्ये समर्थाः भवन्ति। अन्यैः तु न। भूतभविष्यतवर्तमानानां समग्रविषयवस्तूनां धारणकर्त्री एषा पृथिवी। अतः सा अस्मभ्यं लोकं कृणोतु इति अर्थात्, यशं कीर्त्तिञ्च बर्धयतु।।१।।

असंवाधं वध्यतो मानवानां यस्याः उद्वतः प्रवतः समं वहु।
नानावीर्या ओषधीर्या विभर्ति पृथिवी नः प्रथतां राध्यतां नः ।।२।।

**অন্বয়** ঃ (যিনি) মানবানাম্ (মনুষ্যগণকে) অসংবাধম্ (না বেঁধে) বধ্যতঃ (বাঁধেন) যস্যাঃ (যে পৃথিবীর) (আকৃতিতে) উদ্বতঃ (চড়াই), প্রবতঃ (উৎরাই) সমম্ (সমতলভূমি) বহু (কতরকমের), যা (যিনি) নানাবীর্যাঃ (বিচিত্র বীর্যসম্পন্ন) ওষধীঃ (গাছপালা) বিভর্তি (ধারণ করেন) (সেই) পৃথিবী নঃ (আমাদের জন্য) প্রথতাম্ (বিস্তীর্ণা হোন) নঃ (আমাদের জন্য) রাধ্যতাম্ (সমৃদ্ধা হয়ে উঠুন)।।

**বঙ্গানুবাদ** ঃ যিনি (যে পৃথিবী) না বেঁধেই মানবগণকে বাঁধেন, যাঁর (আকৃতিতে) চড়াই-উৎরাই-সমতলের কতো বৈচিত্র্য, যিনি ধারণ করেছেন কতো অসংখ্য শক্তিসম্পন্ন ওষধি, সেই পৃথিবী আমাদের কাছে বিস্তীর্ণা হোন এবং আমাদের জন্য (ধনধান্য পুষ্পে) সমৃদ্ধা হয়ে উঠুন।।

व्याख्या – अस्मिन् सूक्ते ऋषिभिः उच्यते भिन्नजातीनां मनुष्याणां मध्ये प्रत्यक्षरूपेण परोक्षरूपेण च ऐक्यस्थापने पृथिव्याः भूमिका तात्पर्यपूर्णा। तत्र पृथिव्यां सर्वत्र समानभूमिः न विद्यते। कुत्र उन्नतभूमिः कुत्र च अवनतः। कुत्र उर्वरः अपि च कुत्र अनुर्वरः। एषा पृथिवी पुनः विविधानां वनस्पतीनां ओषधीनां च आश्रयस्वरूपा। अतः ऋषीणामाशयः एषा भूमिमाता अस्माकं समीपे विस्तीर्णा भवतु अपि अस्मभ्यं पुष्पफले च समृद्धा भवतु इति।।२।।